मनीका । इत्यमरटीकायां भरतः ॥

कर्णजाहं, क्ली, (कर्णस्य मूलम् । "तस्य पाकमूले" ५ । २ । २४ इत्यादिना जाहच् ।) कर्णमूलम् । इति व्याकरणम् ॥

कर्णजित्, पुं, (कर्णं जितवान् । कर्ण + जि + क्विप् भूते वर्त्तमाने च इति भूते क्विप् तुगागमश्च ।) अर्ज्जुनः । इति हेमचन्द्रः ॥

कर्णदर्पणः, पुं, (कर्णे दर्पण इव ।) ताड़ङ्कनामकर्णभूषणम् । इति त्रिकाण्डशेषः । कानतड़्का इति भाषा ॥

कर्णदुन्दुभिः, स्त्री, (कर्णे कर्णाभ्यन्तरे प्रविश्य ध्वनिजनकतया दुन्दुभिरिव ।) कर्णकीटी । इति शब्दमाला ॥

कर्णधारः, पुं, (कर्णं धरति धारयति वा । कर्ण + धृ + "कर्म्मण्यण्" ३ । २ । १ । इति अण् ण्यन्तादच् वा ।) नाविकः । इत्यमरः । १ । १० । १२ ॥ काण्डारि माजि इत्यादि भाषा ॥ (यथा हितोपदेशे । ३ । ४ ।

"यदि न स्यान्नरपतिः सम्यङ्नेता ततः प्रजा ।
अकर्णधारा जलधौ विप्लवेतेह नौरिव" ॥)

कर्णपाली, स्त्री, (कर्णं पालयति स्वीयौज्ज्वल्येन अतीव शोभां सम्पादयतीति । कर्ण + पाल + "कर्म्मण्यण्" । ३ । २ । १ । इति अण् । गौरादित्वात् ङीष् ।) कर्णान्दुः । इति हारावली । कानबाला इति भाषा ॥

कर्णपिशाची, स्त्री, (कर्णं स्वरूपं पिनष्टीति । कर्ण + पिष् + क्विप् । कर्णपिट् व्यञ्जनं तदाचयति नाशयति स्वरूपदर्शनेन । ततः आ + चि + णिच् अच् ङीष् च ।) देवीविशेषः । तन्मन्त्रादि यदुक्तं तन्त्रान्तरे ।

"कर्णाख्याणलोहितो वकगतोऽनन्तत्रिकारो वदातीतानागतशब्दयुक्तभुवनेशी वह्निजायान्विता ।
ताराद्यो मनुरेष लक्षजपतो ध्यानेन संसेवितः सार्व्वज्ञ्यं लभतेऽचिरेण नियतं पैशाचिकी भक्तितः" ॥

अस्यार्थः । कर्णः स्वरूपः । आख्ये आदौ ईक्षणं इकारः । तद्युक्तो लोहितः पकारः । वकः शकारः । स अनन्तयुक्त आकारयुक्तः । चि स्वरूपम् । वदातीतानागतं स्वरूपम् । ततो ह्रीं स्वाहा । एतेन ॐ कर्णपिशाचि वदातीतानागतं ह्रीं स्वाहा ॥ * ॥ मन्त्रान्तरम् ।

"कह युग्मं कालिके च यक्ष युग्मं तथैव च ।
पिङ्ग पिशाचि स्वाहेति मन्त्रार्णः कथितः प्रिये" ॥

कह कह कालिके यक्ष यक्ष पिङ्ग पिशाचि स्वाहा ॥ * ॥ ध्यानं यथा ।

"कृष्णां रक्तविलोचनां त्रिनयनां खर्व्वाञ्च लम्बोदरीं बन्धूकाभवजिह्निकां वरवराभीयुक्करामुन्मुखीम् । धूम्राविङ्गलटिलां कपालविलसत्पाणिद्वयां चञ्चलां सर्व्वज्ञां शवहृत्कृताधिवसतीं पैशाचिकीं तां नुमः" ॥

अथ पूजा ।

"निशायामर्द्धरात्रौ च हृदि न्यस्य पिशाचिकीम् ।
दग्धमीनं बलिं दत्त्वा रात्रौ संपूज्य संजपेत्" ॥

ओम् कर्णपिशाचि दग्धमीनबलिं यक्ष यक्ष मम सिद्धिं कुरु कुरु स्वाहेति दग्धमीनं बलिं दद्यात् ।

"रक्तचन्दनबन्धूकजवापुष्पादिकञ्च यत् ।
अमृतं कुरु देवेशि स्वाहेति प्रोक्षयेज्जलैः" ॥

पूर्व्वाह्णे किञ्चिज्जप्त्वा मध्याह्ने एकभक्तं निरामिषं भुक्त्वा रात्रावपि तत् संख्यं जपेत् । अन्यत् किञ्चिन्न भोक्तव्यं ताम्बूलादिकं विना । जपस्य दशांशं तर्पणम् । ओम् कर्णपिशाचीं तर्पयामि ह्रीं स्वाहा । एवं क्रमेण लक्षमेकं पुरश्चरणं कृत्वा दशांशं होमयेत् । तदभावे दशांशं तर्पणं कृत्वा वरं प्रार्थयेत् । मूलं रक्तचन्दनेन लिखित्वा यन्त्रोपरि इष्टदेवतां पूजयेत् ॥ * ॥

अथ सिद्धिलक्षणमुच्यते । गगने हुंकारादिश्रवणदीर्घाग्निशिखारूपसन्दर्शनात् सिद्धिर्भविष्यतीति ज्ञात्वा तथाविधमाचरेत् ॥ * ॥

मन्त्रान्तरम् । "प्रणवं माया कर्णपिशाचि मे कर्णे कथय हुँ फट् स्वाहा" । इति प्रदीपतैलं पादयोर्दत्त्वा रात्रौ लक्षं जपेत् । ततः सर्व्वज्ञो भवति । नास्याः पूजा ध्यानम् ॥ * ॥ तथा तारं कामवीजं जयादेवी स्वाहा । अस्या अपि ऋष्यादिन्यासादेरभावः । पूर्व्वं लक्षं जप्त्वा गृहगोधिकां निपात्य तदुपरि जयादेवीं यथाशक्ति सम्पूज्य तावत् जपेत् यावत् सा जीवति । ततः सिध्यति । सिद्धिस्तु मानसादिप्रश्ने कृते सा आयाति ततस्तस्याः पृष्ठे सर्व्वं भूतभविष्यदादिकं पश्यति । इति कृष्णानन्दकृततन्त्रसारः ॥

कर्णपुष्पः, पुं, (कर्णवत् कर्णाकृति पुष्पं यस्य । यद्वा कर्णभूषणार्हं पुष्पं यस्य ।) मोरटलता । इति राजनिर्घण्टः ॥

कर्णपूः, [र्] स्त्री, (कर्णस्य सूर्य्यौरसजातस्य कुन्त्याः प्रथमपुत्रस्य पूः पुरम् ।) कर्णराजपुरम् । तत्पर्य्यायः । चम्पा २ मालिनी ३ लोमपादपूः ४ । इति हेमचन्द्रः ॥

कर्णपूरः, पुं, (कर्णं पूरयति अलंकरोतीति । कर्ण + पूर् + उपपदेकर्म्मण्यण् इति अण् ।) शिरीषवृक्षः । नीलोत्पलम् । अवतंसः । इति मेदिनी ॥ (यथा, अमरुशतके १ ।

"ज्याकृष्टिबद्धखटकामुखपाणिपृष्ठ-
प्रेङ्खन्नखांशुचयसम्बलितोऽम्बिकायाः ।
त्वां पातु मञ्जरितपल्लवकर्णपूर-
लोभभ्रमद्भ्रमरविभ्रमभृत्कटाक्षः" ॥)

अशोकवृक्षः । इति राजनिर्घण्टः ॥

कर्णपूरकः, पुं, (कर्णं पूरयति अवतंसयति । कर्ण + पूर् + ण्वुल् । यद्वा कर्णपूर स्वार्थे कन् । शिरीष वृक्षः । नीलोत्पलम् । अशोकवृक्षः । एतेषां सर्व्वैरेव कुसुमैः कामिनीनां कर्णाभरणं स्यात् अतोऽस्य तथात्वम् ।) कदम्बवृक्षः । इति राजनिर्घण्टः ॥ (कदम्बशब्देऽस्य विवरणं ज्ञातव्यम् ॥)

कर्णप्रतिनाहः, पुं, (कर्णे जातः प्रतिनाहः रोगविशेषः ।) कर्णरोगविशेषः । तस्य सम्प्राप्तिरूपे ।

"सकर्णगूथो द्रवतां यदा गतो
विलायितो घ्राणमुखं प्रपद्यते ।
तदा स कर्णप्रतिनाहसंज्ञितो
भवेद् विकारः शिरसोऽर्द्धभेदकृत्" ॥

इति माधवकरः ॥ (अस्य चिकित्सा यथा,—

"अथ कर्णप्रतीनाहे स्नेहस्वेदौ प्रयोजयेत्
ततो विरिक्तशिरसः क्रियां प्राप्तां समाचरेत्" ॥

इति वैद्यकचक्रपाणिसंग्रहे कर्णरोगाधिकारे ॥

कर्णफलः, पुं, (कर्णः फलमिव यस्य ।) मत्स्यविशेषः । काणलि माछ इति भाषा ॥ अस्य गुणः । अजीर्णरोगश्लेष्मकारित्वम् । इति राजवल्लभः ॥

कर्णमलं, क्ली, (कर्णस्य मलं गूथम् ।) कर्णजमलम् । तत्पर्य्यायः । कर्णगूथम् २ । इति हारावली ॥

कर्णमुकुरः, पुं, (कर्णे मुकुरः दर्पण इव ।) ताड़ङ्कनामकर्णभूषणम् । इति भूरिप्रयोगः ॥

कर्णमोटी, स्त्री, (कर्णं कर्णोपलक्षितरोगविशेषं मोटयति नाशयतीति । यद्वा कर्णं शरीरभेदिरोगविशेषं मोटयतीति । कर्ण + मुट् + इन् वा ङीप् ।) चामुण्डादेवी । इति हेमचन्द्रः ॥

कर्णरोगः, पुं, (कर्णस्य कर्णगतः कर्णे जातो वा रोगः ।) श्रवणव्याधिः । यथा । अथ कर्णरोगाधिकारः । तत्र कर्णरोगाणां नामानि सङ्ख्याश्चाह ।

"कर्णशूलं प्रणादश्च बाधिर्य्यं क्ष्वेड़ एव च ।
कर्णस्रावः कर्णकण्डूः कर्णगूथस्तथैव च ॥
प्रतिनाहो जन्तुकर्णो विद्रधिर्विविधस्तथा ।
कर्णपाकः पूतिकर्णस्तथैवार्शश्चतुर्व्विधम् ॥
तथार्व्वुदं सप्तविधं शोफश्चापि चतुर्व्विधः ।
एते कर्णगता रोगा अष्टाविंशतिरीरिताः" ॥ * ॥

तेषु कर्णशूलस्य संप्राप्तिपूर्व्वकं लक्षणमाह ।

"समीरणः श्रोत्रगतोऽन्यथा चरन्
समन्ततः शूलमतीव कर्णयोः ।
करोति दोषैश्च यथास्वमावृतः
स कर्णशूलः कथितो दुराचरः" ॥

अन्यथाचरन् प्रतिलोमं चरन् । दोषैः पित्तकफरक्तैः । रक्तस्यापि रुजादिकर्त्तृत्वेन दोषसाम्यात् दोषत्वमेव । यथास्वं यथात्मीयनिदानं कुपितैः अथवा यथास्वमिति शूलविशेषणम् । दुराचरः दुरुपचरः मूर्च्छाद्युपद्रवयोगात् ॥ * ॥

कर्णशूलस्यासाध्यतां चाह ।

"मूर्च्छा दाहो ज्वरः कासः क्लमोऽथ वमथुस्तथा ।
उपद्रवाः कर्णशूले भवन्त्येते मरिष्यतः" ॥ * ॥

कर्णनादस्य लक्षणमाह ॥

"कर्णस्रोतःस्थिते वाते शृणोति विविधान् स्वनान् ।
भेरीमृदङ्गशङ्खानां कर्णनादः स उच्यते" ॥ * ॥

बाधिर्य्यलक्षणमाह ।

"यदा शब्दवहो वायुः स्रोतसावृत्य तिष्ठति ।
शुद्धश्लेष्मान्वितो वापि बाधिर्य्यं तेन जायते" ॥*॥

असाध्यबाधिर्य्यमाह ।

"बाधिर्य्यं बालवृद्धोत्थं चिरोत्थञ्च विवर्ज्जयेत्" ॥*॥

क्ष्वेड़माह ।

"वायुःपित्तादिभिर्युक्तो वेणुघोषसमस्वनम् ।
करोति कर्णयोः क्ष्वेड़ं कर्णक्ष्वेड़ः स उच्यते" ॥

क्ष्वेड़शब्दार्थं व्यनक्ति । वेणुघोषसमस्वनमिति । यत उक्तम् । क्ष्वेड़नं वेणुघोषवदिति । ननु कर्णनादकर्णक्ष्वेड़योः को भेदः । उच्यते । कर्णनादः केवलेन वातेन जन्यते तत्र नानाशब्दांश्च शृणोति ।